।। ॐ नमो भगवते वासुदेवाय ।।

# श्रीमद् भागवत रसिक कुटुंब

## गुरु स्तोत्र

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# गुरु स्तोत्र

## ॥ गुरु स्तोत्रम् ॥

अखण्डमण्डलाकारं(म्) व्याप्तं(म्) येन चराचरम् ।
तत्पदं(न्) दर्शितं(म्) येन तस्मै श्रीगुरवे नमः ॥ 1 ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं(म्) येन तस्मै श्रीगुरवे नमः ॥ 2 ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः(र्) गुरुर्देवो महेश्वरः ।
गुरुरेव परं(म्) ब्रह्म तस्मै श्रीगुरवे नमः ॥ 3 ॥

स्थावरं(ञ्) जङ्गमं(म्) व्याप्तं(म्) यत्किञ्चित्सचराचरम् ।
तत्पदं(न्) दर्शितं(म्) येन तस्मै श्रीगुरवे नमः ॥ 4 ॥

चिन्मयं(म्) व्यापि यत्सर्वं(न्) त्रैलोक्यं सचराचरम् ।
तत्पदं(न्) दर्शितं(म्) येन तस्मै श्रीगुरवे नमः ॥ 5 ॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥ 6 ॥

चैतन्यः(श्) शाश्वतः(श्) शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतस्तस्मै श्रीगुरवे नमः ॥ 7 ॥

ज्ञानशक्तिसमारूढः(स्) तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥ 8 ॥

अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥ 9 ॥

शोषणं(म्) भवसिन्धोश्च ज्ञापनं(म्) सारसम्पदः ।
गुरोः(फ्) पादोदकं(म्) सम्यक् तस्मै श्रीगुरवे नमः ॥ 10 ॥

न गुरोरधिकं(न्) तत्त्वं(न्) न गुरोरधिकं(न्) तपः ।
तत्त्वज्ञानात् परं(न्) नास्ति तस्मै श्रीगुरवे नमः ॥ 11 ॥

मन्नाथः(श्) श्रीजगन्नाथः(थो) मद्गुरुः(श्) श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ 12 ॥

गुरुरादिरनादिश्च गुरुः(फ्) परमदैवतम् ।
गुरोः(फ्) परतरं(न्) नास्ति तस्मै श्रीगुरवे नमः ॥ 13 ॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥ 14 ॥